इत्यादीनि सर्वाणि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। [1]विरिब्धः = स्वरः, रेभितः, [2]रेभणः, [A]रेभः इमानि रूपाण्यधिकान्यत्रेति विशेषः।

## (1441) "रेवृ प्लवगतौ"

(I-भ्वादिः-507. सक. सेट्. आत्म.) [अ]

'प्लवगतिः=प्लुतिगतिः=' इति मा. धा. वृत्तौ। '—प्लुतिगतौ' इति क्षीरस्वामी।

रेवकः-विका, रेवकः-विका, रिरेविषकः-षिका, रेरेवकः-विका;

---

1. 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु' (7-2-18) इति स्वरेऽभिधेये निष्ठायामिडभावः, उपधाया ह्रस्वत्वं च निपात्यते। अन्यत्र विरेभितः। 'स्वरे वाच्ये विरिब्धं च शब्दार्थाद् रेभतेर्भवेत्।' इति प्रक्रियासर्वस्वम्। अत्रेदं बोध्यम्। काशिकायाम् (7-2-18) ".. ...अन्ये तु 'विरिभितम् अन्यत्' इति पठन्ति। (ये ?) रभिं (रिभिं ?) सौत्रं धातुं पठन्ति, ते विरिभितमिति प्रत्युदाहरन्ति।" इति विरिब्धपदव्याख्यानावसरे प्रतिपादितम्। तेन रिभधातुः सौत्रः कश्चिदस्तीति प्रतीयते। सूत्रेषु तु कुत्रापि नोपात्तोऽयम्। किञ्च, 'ये रिभिं ......' इत्यादिकेन वाक्येनेह भाव्यमिति, तच्च वाक्यं व्याख्यान्तर्गतं प्रमादेन मूल एव निक्षिप्तं स्यादिति च भाति।

2. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिको युच्प्रत्ययः।

A. 'प्रचीभ्यरेभैः पशवोऽम्भसांनिधिप्ररम्भणस्तम्भिभिरागता व्रजम्।' धा. का. 1-50.

[अ] "अत्र मैत्रेयः 'प्लव' इति धात्वन्तरमाह, तच्चिन्त्यम्, यदि हि स्यात् आप्लावशब्दस्यास्मात् घञि सिद्धौ तदर्थं 'विभाषाऽऽङि रुप्लुवोः' (3-3-50) इति प्लुवः पक्षे घञ्विधानमनर्थकं स्यात्। तथा प्लुङो णौ वृद्ध्यावादेशयोश्चङि णौ कृतस्य स्थानिवत्त्वात् प्लुशब्दस्य द्विरुक्तावपुप्लुवदिति नित्ये प्राप्ते पक्षे अपिप्लवदिति सिद्ध्यर्थं 'स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' (7-4-81) इति उकारस्येत्वविधानमनर्थकं स्यादिति। सति ह्यस्मिन्ननेनैवापिप्लवत् इति भविष्यति। अत एव किलापरितुष्यन् मैत्रेयोऽपि "'प्लव इत्येके' इत्याह" इति माधवधातुवृत्तिवाक्यमिहानुसन्धेयम्।